Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ मायामन्त्रः —

मङ्कण ऋषिः । उष्णिक् छन्दः । माया देवता । ह्रीं बीजम् । ह्रूँ शक्तिः । मायाकरणे०(विनियोगः ।) ह्रीं हृत् । ह्रूं शिरः । इत्याद्यङ्गानि । ध्यानम् —

मायापटेन जगतां विवशं च मोहं
मायाकुतूहलमनोरथमाकरोति ।
नारायणप्रियतमा सुतमालनीला
शूलायुधा विजयते तुरगाधिरूढा ॥

ह्रीं महामाये जगन्मोहिनि सर्वजनवाङ्मनःकायचक्षुश्श्रोत्रघ्राणप्राणान् मोहय मोहय स्वेच्छाकुतूहलं शीघ्रं दर्शय दर्शय ह्रीं स्वाहा ॥ पञ्चाशत्सहस्र-जपः ॥

दर्शनादर्शनं चैव तथा दर्शनदर्शनम् ।
मन्त्रस्मरणमात्रेण भवेदेव न संशयः ॥